ह्यमन्तत:" । "ततः शतसहस्रांशुर्म्मथ्यमानात्तु सागरात् । प्रसन्नात्मा समुत्पन्नः सोमः शीतांशुरुज्ज्वलः । श्रीरनन्तरमुत्पन्ना घृतात् पाण्डुरवासिनी । सुरा देवी समुत्पन्ना तुरगः पाण्डरस्तथा । कौस्तुभस्तु मणिर्द्दिव्य उत्पन्नो घृतसम्भवः । मरीचिविकचः श्रीमान् नारायण उरोगतः" भा०आ०१८अ० "उच्चैः श्रवाहयश्रेष्ठो मणिरत्नञ्च कौस्तुभम्" रामा० उक्तेः क्षीरत्वमपि

"कौस्तुभाख्यमपांसारं बिभ्राणं वृहतोरसा" "सकौस्तुभं ह्रेपयतीव वक्षः" रघुः । २तैलभेदे न० "घृतार्थे गोघृतं ग्राह्यं तदभावे तु माहिषम् । आज्यं, वा तदभावे तु साक्षात्तैलं ग्रहीष्यते । तैलाभावे ग्रहीतव्यं तैलं जर्त्तिलसम्भवम् । तदभावेऽतसीस्नेहं कौस्तुभं सर्षपोद्भवम् । वृक्षस्नेहोऽथवा ग्राह्यः पूर्व्वाभावे परःपरः" कर्कधृतं मण्डनवाक्यम् । कौस्तुभमित्यत्र कौसुम्भमिति पाठस्तु सम्यक् । ३तन्त्रोक्ते मुद्राभेदे "अनामाङ्गुष्ठसंलग्ना दक्षिणस्य कनिष्ठिका । कनिष्ठयान्यया बद्धा तर्ज्जन्या दक्षया तथा । वामानामाञ्च बध्नीयात् दक्षिणाङ्गुष्ठमूलके । अङ्गुष्ठमध्यके भूयः संयोज्य सरलाः पराः । चतस्रोऽप्यत्र संलग्ना मुद्रा कौस्तुभसंज्ञिका" तन्त्रसारः ।

**कौस्तुभवक्षस्** पु० कौस्तुभोवक्षसि यस्य । विष्णौ हारा० कौस्तुभहृदयादयोऽप्यत्र पु० । एवं कौस्तुभलक्षणादयोऽप्यत्र ।

**क्नथ** बधे वा० चु० उभ० पक्षे भ्वा० पर० सक० सेट् घटादि । क्नथयति-ते क्नथति अचिक्नथत्-त अक्नथीत्-अक्नाथीत् । क्नथयां-बभूव आस चकार—चक्ने-चक्नाथ ।

**क्नस** दीप्तौ कौटिल्ये च दिवा० पर० अक० सेट् । क्नस्यति अक्नसीत्-अक्नासीत् चक्नास । घटा० क्नसयति-ते । अचिक्नसत्-त उदित् क्नसित्वा-क्नस्त्वा ।

**क्नस** दीप्तौ वा० चु० उभ० पक्षे भ्वा० अक० सेट् घटादि क्नसयति-ते । क्नसति । अचिक्नसत्-त अक्नसीत्-अक्नासीत् क्नसयां बभूव आस चकार चक्ने चक्नास । उदित् क्नसित्वा-क्नस्त्वा । "ध्वृ ह्वृतौ क्नस् कुसि कि च भासने कुस्य इच्छिषि" बोपदेवव्याख्याने "परोऽनुबन्धः पूर्व्वेषामेकयाक्यस्थत्वात्तु" इति तदुक्तिमाश्रित्य भ्रान्त्या दुर्गादासेन क्नस इदित्त्वमुक्तम् तच्चिन्त्यम् । पा० धातुपाठे चुरादिषु "तसिपिसि कुसि दशि कुशी" इत्यादिना कुसेरेवेत्त्वमुक्तेः दिवादिषु च क्नसु ह्वरणदीप्त्योरित्युक्तेः वटादौ च जनीजृष क्नसु रञ्ज इति पाठात् इदित् क्नसधातोरदर्शनात् । अतः परानुबन्धस्य ... ... ... चुरादित्वम् अन्यथा कुसिवत् क्नसीत्येव मूलकृत् पठेत् । न च तथाऽपाठि अतस्तस्य नेदित्त्वम् ।

**क्नूय** दुर्गन्धे आर्द्रीभावे शब्दे च भ्वा० आत्म० अक० सेट् । क्नूयते अक्नूयिष्ट चुक्नूये । णिचि क्नोपयति ते । अस्य चेलार्थककर्म्मण्युपपदे णमुल् चेलक्नोपम् वस्त्रक्नोपम् । "यूनि गाढपरिरम्भिणि वस्त्रक्नोपमम्बु ववृषे मदनेन" माघः । 'वस्त्रं क्नोपयित्वा परिषिच्येत्यर्थः" मल्लि० । अभि+अतिव्याप्त्या आर्द्रीभावकरणे पूतीभावकरणे च सक० "आपो वै सर्वमन्नं ताभिर्हीदमभिक्नूयमिवादन्ति" शत० ब्रा० १४।१।१।१४। यान्तत्वात् तान्धील्ये नातोयुक् किन्तु ह्रस्व । क्नूयिता इत्येव । [रीत् चक्मार ।

**क्मर** कौटिल्ये भ्वा० पर० अक० सेट् । क्मरति अक्मा(क्म)-

**क्य** त्रि० कः प्रजापतिस्तस्मै हितः यत् । प्रजापतिहिते । "वेत्थ चत्वारि क्यानां क्यानीति" प्रश्ने "एतान्येव चत्वारि क्यानां क्यानि" शत० ब्रा० १०।२।४।२।४। भा०तथार्थतोक्ता

**क्याम्बू** स्त्री क्यं प्रजापतिहितमम्बु यत्र ऊङ् । दूर्वाभेदे "क्याम्बूरत्ररोहतु शाण्डदूर्वा व्यल्कशा" ऋग्०१८।३।६।

**क्रंश** प्रकाशने भ्वा० सक० सेट् क्रंशति अक्रंशीत् चक्रांश । "क्रंशतेर्वा प्रकाशयतिकर्म्मणः । निरुक्तकारः २।२५।

**क्रकच** पुं० क्र इति कचति शब्दायते कच-शब्दे अच् । १ग्रन्थिलाख्ये वृक्षे मेदि० । २दारुदारणास्त्रे करपत्रे (करात) पु० न० अमरः । ज्योतिषोक्ते ३योगभेदे च । तल्लक्षणञ्च "षष्ठ्यादितिथयो मन्दात् विलोमं क्रकचः स्मृतः" इति "यथा शनौ षष्ठी, शुक्रे सप्तमी, गुरावष्टमी, बुधे नवमी, भौमे दशमी, सोमे एकादशी, रवौ द्वादशी, एते योगाः क्रकचाख्या ज्ञेयाः पी०पू०धा० । यदाह नारदः "त्रयोदश स्युर्मिलने संख्ययोस्तिथिवारयोः" क्रकचो नाम योगोऽयं मङ्गलेष्वतिगर्हितः" [क्रकचदलादयोऽप्यत्र

**क्रकचच्छद** पु० क्रकच इव छदो यस्य । केतकीवृक्षे त्रिका०

**क्रकचपत्र** पु० क्रकच इव पत्रमस्य । १शाकवृक्षभेदे राजनि० २केतकीवृक्षे च ।

**क्रकचपाद(द्)** पु० क्रकचमिव पादो यस्य वा अन्त्यलोपः । कृकलासे हारा० [लताभेदे । त्रिका० ।

**क्रकचपृष्ठी** स्त्री क्रकच इव पृष्ठं यस्याः ङीष् । (कइ) म-

**क्रकचव्यवहार** पु० लीलावत्युक्ते क्रकचच्छेद्यवस्तुनो वेतनज्ञानार्थे तत्फलज्ञापके गणितभेदे यथा "क्रकचव्यवहारे करणसूत्रं वृत्तम् । पिण्डयोगदलमग्रमूलयोर्दैर्घ्यसङ्गुणितमङ्गुलात्मकम् । दारुदारणपथैः